उपशास्त्री-II खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीयमहाकाव्यम् - प्रथमः सर्गः

1) इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्याः भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥

-प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - विचारशून्या तवेयं मतिः कथंकारं समजनि इति मया ज्ञातुं न पार्यते, यतो हि लोकानां मनोव्यापारा विचित्रप्रकारा भवन्ति । किन्तु तवेमां चरमदुर्दशामवलोक्य मम तु आधिर्भिरश्येति भज्यते । त्वं च निर्विकार इव धैर्यं वहसीति महदाश्चर्यम् ।

:- अहं = मैं (द्रौपदी), इमां = इस, तावकीं = तुम्हारी, धियं = बुद्धि को, न वेद = नहीं समझ पातीं । चित्तवृत्तयः = (लोगों की) चित्तवृत्तियाँ विचित्ररूपाः खलु = विचित्र प्रकार की होती हैं । परां = अत्यन्त भवदापदं = आपकी विपत्ति को, विचिन्तयन्त्याः = सोचती हुई, मम = मेरे, चेतः = चित्त को, आधयः = मनोव्यथाएँ, प्रसभं = हठात्, रुजन्ति = नष्ट कर रही हैं ।

Renu Devi
16/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

शास्त्री - I खण्ड साहित्य
मेघदूत
सूक्तिव्याख्याभागः

प्र० (1) - याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।

उत्तरम् - प्रसंग → प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति ।

व्याख्या :- दुर्भाग्यवशात् पत्नीविरहितो यक्षः स्वप्रियां प्रति कुशलक्षेमसन्देशप्रेषणेच्छुः मेघंप्रति स्वयाच्ञाः महत्त्वं प्रदर्शयन्नाह -

हे मेघ ! भुवनविदिते पुष्करावर्तकानां वंशे समुत्पन्नं यथेच्छवपुर्धारिणं इन्द्रस्य प्रधानव्यक्तित्वे भवन्तं सम्यग्जानामि । अधिगुणे = अधिकगुणवति पुरुषविषये याच्ञा = याचना, मोघा अपि = निष्फलापि, वरम् = उत्तमम् ईषत्प्रियम् । दातुर्गुणसम्पन्नत्वात्प्रियत्वम् । याच्ञावैफल्यात् ईषत्प्रियत्वम् बोध्यम् । एतद्वैपरीत्येन अधमे = निर्गुणे पुरुषविषये, लब्धकामापि = सफलापि न वरम् = ईषत्प्रियमपि न भवतीत्यर्थः ।

Renu Devi
16/10/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

शास्त्री - I खण्ड साहित्य

सप्तमोऽङ्कः अभिज्ञान शाकुन्तलम्

प्र०(1) रथेनानुद्घातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः ।
इहायं सत्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥

उत्तरम् = प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राज्ञा दुष्यन्तेन निजतनयस्य वंश-प्रतिष्ठाकरत्वमुद्दिश्य पृष्टो महर्षिः कश्यपः तस्य भाविफलं वर्णयन् आशंसते ।

व्याख्या :– राज्ञा दुष्यन्तेन तस्य तनयस्य वंशप्रतिष्ठाकरत्वमुद्दिश्य परिपृष्टो महर्षिः कश्यपः तस्य भाविशुभफलं निर्दिशन्नाह – आयुष्मन्! अयं शकुन्तलायां जातस्ते तनयो नूनं त्वद्वंशप्रतिष्ठापको भविष्यति । प्रथममयं वेगवता रथेन सप्तसागरां धरित्रीं विजित्यैकच्छत्रः सम्राट् भविष्यति। इदानीम् अस्मिन् समाश्रमे सर्वेषां सिंहव्याघ्रादीनां सत्वानां दमनात् सर्वदमन इत्यभिख्यां गतः, अग्रे चासौ जनानां रक्षणात्, भुवनस्य पालनात् भरत इति नाम्ना प्रसिद्धो भविष्यति तथा च महाप्रभावो दीर्घायुः सौभाग्यसम्पन्नोऽयं ते तनयो नूनं चक्रवर्ती राजा भविष्यति । अतो भवताऽस्य सौभाग्यविषये निश्चिन्तेन भाव्यमिति भावः । न कोऽपि संशयः कार्यः । अत्र स्वभावोक्ति-भाविककाव्यलिङ्गा लङ्काराः शिखरिणी छन्दश्च ।

Renu Devi
16/10/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

उपशास्त्री - I खण्ड साहित्य - तृतीय पत्रम्

किरातार्जुनीय महाकाव्यम् प्रथमः सर्गः

प्र० (1) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति — वार्ताप्रसङ्गेन यदि कदाचित् जनाः तव नामोच्चारणं कुर्वन्ति चेद् तदास्मृतार्जुन पराक्रमः स नीचैर्मुखः सन् स्वं दुःखायते यथा विषवैद्येषु प्रकृतमैरुच्चारित कठोरमन्त्रपदात् स्मृत गरुड़पादाविक्षेपः सर्पः दुःखायते।

व्याख्या - कथाप्रसङ्गेनजनैः = विषवैद्यों में श्रेष्ठ जो लोग हैं उनसे, उदाहृतात् = उच्चारण किये हुए, तवाभिधानात् = (त=) ताक्ष्य और (व=) वासुकि के नाम वाले सुदुःसहात् = अति कठोर, मंत्रपदात् = मंत्र के पद से, अनुस्मृताखण्डलसू विक्रमः = स्मरण किया है (आखण्डल = इन्द्र के (सूनु =) भाई उपेन्द्र (वि के वि = पक्षी (गरुड़) के क्रम (= आक्रमण) को जिसमें ऐसे। उरग इव = सर्प तरह। कथाप्रसङ्गेन = गोष्ठियों के प्रसंग में, जनैः = लोगों से, उदाहृताद् = हुए। तव = तुम्हारे। अभिधानात् = नाम से। अनुस्मृताखण्डलसूनुविक्र = स्मरण किया है (आखण्डलसूनु = इन्द्रपुत्र =) अर्जुन के विक्रम को जिसने ऐसा, (वह दुर्योधन)। नताननः (सन्) = मुँह झुकाकर, व्यथते = दुःखी होता है

Renu Devi
16/10/20

एरच्या उमाकान्त सं० महावि० सुखसेना, पूर्णि